401. चित्त शब्दस्य धातुः, प्रत्ययः अर्थश्च लिखत।
उ. चिती संज्ञाने धातोः क्त प्रत्यये सति चित्त शब्दः निष्पद्यते, यस्यार्थः भवति यत् - "संज्ञानमिति"।

402. वृत्ति शब्दस्य मूल धातुः, प्रत्ययः अर्थश्च स्पष्टयत।
उ. वृतु वर्तने धातोः क्तिन् प्रत्यये सति 'वृत्तिः' शब्दः निष्पद्यते, यस्यार्थः व्यवहारमिति (बर्ताव करना)।

403. चित्त शब्दं विस्तरेण स्पष्टीकुरुत।
उ. चित्तस्य व्यवहार एव वृत्तिः इत्युच्यते, वृत्तिना एव चित्तः ज्ञानं प्राप्नोति। यद् ज्ञानं इन्द्रियाणां माध्यमेन विषयात् एकीभूता बुद्धिः ज्ञानं गृह्णाति। मनः तस्य ज्ञानस्य प्रस्तुतीकरण करोति। एवं प्रकारेण चित्तः इन्द्रियैः विषयान् गृह्णाति एवं चित्तमिदं चञ्चलः नित्य परिवर्तनशीलः वर्तते। यस्मिन् नूतना वृत्तयः उत्पद्यन्ते अतः वयं वक्तुं शक्नुमः यत् चित्तस्य विषयेभ्यः संबंध कारणात् यत् परिणामोत्पद्यते ताः वृत्तयः इत्युच्यते।

404. कर्म शब्दस्य मूल धातुः, प्रत्ययः अर्थश्च स्पष्टयत।
उ.

405. कर्मस्य अवधारणा किम् अस्ति?
उ. कर्म नाम क्रिया अर्थात् किमपि कार्यकरणमेव कर्म उच्यते। कोऽपि क्रिया, कृत्य उत कार्य तदैव कर्म उच्यते यत् तस्य कर्तुः संकल्प भाव विचारः स्यात्। यतोहि एतादृशः अज्ञानक्रियायाः मूलं (बीज) कर्तुः चित्ति अङ्कितं न भवति तस्य कोऽपि फलं न भवति। यथा निद्रासमये पिपीलिकायाः मरणं, उदरे पाचनक्रिया; एतत् कर्म नास्ति अपितु क्रिया अस्ति। अतः कोऽपि क्रिया, कार्य उत कृत्य तदैव कर्म भवितुं शक्नोति यदा तासु क्रियासु कार्येषु च संकल्प भावना, विचारः तत्र स्यात् इति।

406. श्रीमद्भगवद्गीतानुसारं कर्मयोगस्य परिभाषां लिखत।
उ. " बुद्धियुक्तो ........................ योगः कर्मसु कौशलं॥ (2/50) अर्थात् समबुद्धिपुरुषः पुण्यं पापञ्च अस्मिन्नेव लोके त्यजति अर्थात् तेभ्यः मुक्तो भवति; अतः त्वं समत्वरूपयोगे भव। समत्वरूपयोगः एव कर्मसु कुशलता

Scanned with CamScanner

Scanned with CamScanner

अस्ति अर्थात् कर्मबन्धनात् मुक्त्योपाय: वर्तते।

407. वैदिकसाहित्येषु कर्मण: कति भेदा: वर्णितास्सन्ति?

उ. द्वौ (२)। विहितकर्म: निषिद्धकर्मश्च इति।

408. विहितकर्मण: कति भेदास्सन्ति?

उ. चत्वारि। (क) नित्यकर्म (ख) नैमित्तिककर्म (ग) काम्यकर्म (घ) प्रायश्चित्तकर्मश्च इति।

409. किं नित्यकर्म: अस्ति?

उ. नित्यकर्म: → य: मनुष्य: दैनिकजीवने कर्माणि करोति तद् नित्यकर्म: उच्यते; यथा → दिनचर्याया: शौचादि, भोजनादि, आजीविका-श्रम:, अध्ययन-अध्यापन कार्यादि इति।

410. नैमित्तिककर्म स्पष्टयत।

उ. एतादृशा: कर्म: य: धर्मशास्त्रं, नीतिशास्त्रं इत्यादिना निर्देशानुसारम् क्रियते; अर्थात् य: कर्म: निमित्तं स्वीकृत्य क्रियते तद् नैमित्तिकं कर्म: उच्यते। यथा → शिशो: नामकरणं, शिक्षारम्भात् पूर्वं विद्यारम्भसंस्कार: विवाहसंस्कार:, अन्त्येष्टि संस्कारेत्यादय: कर्म: नैमित्तिकं कर्म: उच्यते।

411. काम्यकर्म: नाम किम्?

उ. यत् कर्म: स्वेच्छापूर्त्यर्थं, वासनार्थं क्रियते तत् कर्म: काम्यकर्म: उच्यते।

412. प्रायश्चित्त कर्मण: अभिप्रायं किमस्ति?

उ. य: कर्म: प्रायश्चित्तार्थं क्रियते अर्थात् अस्माभि: पूर्वं किमपि त्रुटि: दोष:, पापम् इत्यादिनां शमनार्थं यानि कर्माणि क्रियन्ते तानि कर्माणि प्रायश्चित्तकर्माणि उच्यते। यथा → उपवास, तप:, साधना, मौनं, तितिक्षा चान्द्रायणव्रतादय: प्रायश्चित्त कर्माणि भवन्ति।

413. निषिद्धकर्म: नाम किम्?

उ. य: व्यक्ति: वासनाया: पूर्त्यर्थं शास्त्रविपरित (विरुद्ध) कर्माणि करोति तद् निषिद्धकर्म: उच्यते।

414. उपनिषदा: मीमांसादर्शनानुसारं च कर्मणां भेदास्सन्ति? लिखत।

उ. त्रीणिकर्माणि। (क) संचितकर्म: (ख) क्रियमाणकर्म: (ग) प्रारब्धकर्मश्च इति।

Scanned with CamScanner

415. सञ्चितकर्म नाम किम्? लिखत।

उ. यत्कर्म पूर्वम् अस्माभिः विहितं, यस्य मूलम् अस्माकं चित्ते अङ्कितोऽस्ति तत्कर्म सञ्चितकर्मोच्यते। अस्माकं चित्ते पूर्वस्मिन् जातानि अनेकानि जन्मानि कर्माणि सञ्चितकर्मरूपेण चित्ते तिष्ठति। चित्तमस्माकं सञ्चितकर्म नाम भाण्डागारः वर्तते। येषां कर्मणां प्राप्तिः .................।

416. क्रियमाणकर्मणः अभिप्रायं किम् अस्ति? स्पष्टयत।

उ क्रियमाणकर्मणः भविष्यत्कर्मणः अपि संज्ञा प्रदत्ताऽस्ति। यत् कर्म भविष्यत् काले करिष्यते तथा च तेषां फलप्राप्तिरपि भविष्ये। अनागतकाले भविष्यति। अर्थात् यत् कर्म वर्तमानसमये क्रियते तथा च तेषां फलप्राप्तिः आगामीसमये भविष्यति तानि सर्वाणि कर्माणि क्रियमाणकर्माणि भवन्ति।

417. प्रारब्धकर्म स्पष्टयतु।

उ. सञ्चितकर्म यदा परिपक्वोभूत्वा अभिव्यक्तो भवति तत् प्रारब्धकर्म उच्यते। प्रारब्धकर्मणः मूलं (बीज) अस्माकं चित्ते संस्कारवासनारूपेण च सञ्चितो भवति। एतादृशः कर्म एकस्मिन् समये परिपाकः भूत्वा प्रकट्यते। यथा- सुखदुःखं, भाग्यं, सफलता-असफलता च, लाभ-हानि इत्यादीनां कारणं प्रारब्धकर्म एव भवति।

418. श्रीमद्भगवद्गीतानुसारं कर्मणः गतिः किं उक्तम्?

उ. "कर्मणो ह्यपि ............... गहना कर्मणो गतिः॥ (4/17) अर्थात् कर्मणः स्वरूपम्, अकर्मणः स्वरूपं तथा च विकर्मणः स्वरूपमपि ज्ञातव्यम् यतोहि कर्मणा गतिः गहना वर्तते।

419. श्रीमद्भगवद्गीतानुसारं कर्मणः कति भेदास्सन्ति?

उ. त्रयः। (क) सकाम कर्म (ख) निष्कामकर्म (ग) यज्ञ कर्म।

420. श्रीमद्भगवद्गीतानुसारेम् अकर्म किं भवति?

उ. एतादृशः कर्म यत् अनासक्त भावेन क्रियते येनाभ्यासेन अन्तःकरणे किमपि संस्काराः न भवन्ति तद् अकर्म भवति। अस्मिन् शास्त्रविहित कर्म, शास्त्रविरुद्धकर्मश्च अपि भवति।

421. श्रीमद्भगवद्गीतानुसारं विकर्म कम् उक्तम्?

उ. शास्त्रं मनुष्यधर्मविरुद्धं च कर्म विकर्म उच्यते। एतादृशाः कर्माः स्वार्थसिद्ध्यर्थं वासनायाः पूर्त्यर्थं च क्रियते। पापकर्म एव विकर्म भवति।

Scanned with CamScanner

Scanned with CamScanner

422. श्रीमद्भगवद्गीतानुसारं कर्मः उच्यते ? लिखत।
उ. वेद, शास्त्रं तथा च महापुरुषाणां निर्देशानुसारं यानि मनस्योचित-कर्माणि क्रियन्ते तानि कर्माणि एव कर्मः उच्यते। अर्थात् मानवैः विहितं कर्मः एव कर्मः भवति। एतानि कर्माणि एव योगसाधनया कर्मयोगे परिवर्त्यते।

423. त्रिशिखिब्राह्मणोपनिषदनुसारं कर्मयोगस्य परिभाषां लिखत।
उ. "कर्म कर्त्तव्यमित्येव विहितेष्वेव कर्मसु।
बन्धनं मनसो नित्यं कर्मयोगः स उच्यते॥ अर्थात् विहितकर्मसु बुद्धेः भावः एव कर्त्तव्यकर्मः भवति; मनसः एतद् बन्धनमेव कर्मयोगः इत्युच्यते।

424. स्वामीविवेकानन्दस्य मतानुसारं कर्मयोगस्य परिभाषा किमस्ति? लिखत।
उ.

425. श्रीमद्भगवद्गीतानुसारं सकामकर्मः किम् अस्ति ?
उ

426. श्रीमद्भगवद्गीतानुसारं निष्कामकर्मः उच्यते ? लिखत।
उ.

427. श्रीमद्भगवद्गीतानुसारं कुः यज्ञ-कर्मः भवति ? स्पष्टीकुरुत।
उ.

428. पातञ्जलयोगसूत्रानुसारं कर्मः कतिविधः; सूत्रेण सह स्पष्टीकुरुताम्।
उ. चतुर्विधं। ① शुक्लकर्मः ② कृष्णकर्मः ③ शुक्लकृष्णकर्म
④ अशुक्ल-अकृष्णकर्म इति।
"कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्" (पा॰यो॰सू॰ 4/7) अर्थात् योगीनाम् कर्मः अशुक्लः अकृष्णश्च भवति तथा च अन्येषां त्रिविधं भवति यत्
① शुक्लकर्मः → सुकुकर्म, पुण्यकर्म वा। एतत् कर्म शास्त्रानुकूलं भवति।
② कृष्णकर्म → पापकर्म इति। शास्त्रविरुद्धं कर्म कृष्णकर्म भवति।
③ शुक्लकृष्णकर्म → मिश्रितकर्मः अर्थात् पुण्यकर्म पापकर्मः सहैव भवति; तत् शुक्लकृष्णकर्मः उच्यते एतानि कर्माणि सामान्यतया सांसारिकजनाः कुर्वन्ति।
④ अशुक्ल अकृष्णकर्म → पापपुण्यकर्मभ्यः भिन्नकर्माणि ~~अशुक्ल-अकृष्णकर्म~~ अशुक्लाकृष्णकर्माणि भवन्ति। एतानि कर्माणि योगीजनाः कुर्वन्ति।

Scanned with CamScanner

५२९. श्रीमद्भगवद्गीतानुसारं कर्मयोगस्य प्रमुखाः परिभाषाः वर्णयन्तु।
उ. (क) कर्मणः फलेच्छायाः अभावः, निरन्तरं ~~स्वकर्मणः~~ पालनं कर्मयोगः भवति।
(ख) आत्मलोककल्याणार्थं स्वार्थं परित्यज्य कर्त्तव्यकर्म करणमेव कर्मयोगः इति।
(ग) मृत्युः जय-पराजयः लाभ-हानि इत्यादीन् द्वन्द्वानां परित्यागपूर्वकम् नित्यकर्मकरणमेव कर्मयोगः उच्यते।
(घ) कर्मयोगीनां कर्म सदैव विहितं, निष्काम अहङ्काररहितो च भवति।

५३०. पातञ्जलयोगसूत्रानुसारं चतुर्षु कर्मषु कः श्रेष्ठः कर्मः अस्ति?
उ. 'अशुक्ला कृष्ण कर्म'

५३१. श्रीमद्भगवद्गीतायां गुणान् आधारीकृत्य ~~कर्मणः~~ कर्मणः कतिधा विभाजनं कृतम्?
उ. त्रिधा विभक्तम्। सत्व, रजस तथा च तामसिकं कर्म इति।

५३२. श्रीमद्भगवद्गीतानुसारं सत्वकर्म नाम किम्?
उ. "नियतं सङ्ग......... यत्तत्सात्त्विकमुच्यते ॥" (18/23) अर्थात् यत् कर्म शास्त्रविधिना कृतं, कर्तापन इत्यस्य अभावः स्यात् तथा च ~~पुरुषैः~~ फलाकांक्षारहितं, रागद्वेषं विहाय कृतं तत् सात्त्विकमुच्यते।

५३३. श्रीमद्भगवद्गीतानुसारं राजसकर्मः उच्यते?
उ. "यत्तु कामेप्सुना ............ तद्राजसमुदाहृतम् ॥" (18/24) अर्थात् यत् कर्म बहुपरिश्रमयुक्तो भवति भोगान् ~~इच्छुकः पुरुषः~~ भोगाकांक्षी पुरुषैः ~~अह~~ अहङ्कारयुक्त पुरुषैः यत् कर्म क्रियते तद् राजस कर्म उच्यते।

५३४. श्रीमद्भगवद्गीतानुसारं तामसकर्मणः परिभाषा किं अस्ति?
उ. "अनुबन्धं क्षयं ............. यत्तत्तामसमुच्यते ॥ (18/25) अर्थात् यत् कर्म परिणामं, हिंसा, सामर्थ्यं च अविचार्य केवलम् अज्ञानात् आरभ्यते तत् तामसकर्म उच्यते।

५३५. श्रीमद्भगवद्गीतानुसारं निष्कामकर्मयोगी उच्यते? लिखतु।
उ. गीतायाः कर्मयोगी फलम् आसक्तिं च त्यक्त्वा भगवदाज्ञानुसारं ~~भगवत्~~ भगवदर्थः समत्वबुद्ध्या, शास्त्रविहितकर्तव्यकर्म कुर्वन् भगवद्भक्तिं करोति। सः निष्काम कर्मयोगी उच्यते। (गीतायां निम्न अध्यायस्य श्लोकेषु निष्काम कर्मयोगीनः वर्णनं प्राप्यते यत् → 2/47 तः 51 पर्यन्तं, 3/7, 19, 30; 4/14; 5/10; 6/01; 8/7; 9/27-28, 12/6; 10/11; 18/6, 9, 45, 46, 47 इत्यादयः)

Scanned with CamScanner
Scanned with CamScanner

436. हठयोगप्रदीपिकानुसारं योगसाधनायां कानि बाधकतत्वानि भवन्ति ? वर्णयत।

उ. "अत्याहारः प्रयासश्च प्रजल्पो नियमग्रहः।
जनसंगश्च लौल्यं च षड्भिर्योगो विनश्यति ॥ (1/15) अर्थात्

अत्याहारः, प्रयासः, प्रजल्पः, नियमग्रहः, जनसंग लौल्यं च।

① अत्याहारः → अत्यधिकं भोजनम्।

② प्रयासः → अत्यधिकं परिश्रमं मनसा, वचसा, कायेन च।

③ प्रजल्पं → प्रजल्पं नाम प्रलपनम्, अत्यधिकं भाषणम्।

④ नियमग्रहः → नियमपालने दुराग्रहः इति; यथा - शीतलजलेन स्नानम्, प्रातःकाले स्नानं, भोजने उत आहारे फलम् अथवा अन्नम् एकस्येव ग्रहणम् इत्यादयः नियमानां पालने आग्रहः एव नियमग्रहः इति उच्यते।

⑤ जनसङ्गः → अत्यधिकं जनानां सङ्ग इति। एतेन हठयोगीनां चित्ते कामं, क्रोधः, रागः, द्वेषः, लालसा, मोहः अहङ्कारश्चेत्यादीनां विकारेभ्यः साधनायाम् उत्पन्नाः विघ्नाः इति।

⑥ लौल्यम् → इन्द्रियाणां चपलता इति। दशसु इन्द्रियेषु एकस्मिन्नपि उत सर्वेषामपि चपलता कारणात् साधकस्य बुद्धयाः मनसः च स्थिरता नष्टा भवति। अतः साधकः स्व योगसाधनायां एतान् षड् बाधक-कृत्यान् सर्वथा त्यागः करणीयः इति।

437. हठयोगप्रदीपिकानुसारं योगसाधनायां कानि साधकतत्वानि भवन्ति ? वर्णयत।

उ. "उत्साहात्साहसाद्धैर्यात्तत्वज्ञान निश्चयात्।
जनसंगपरित्यागात्षड्भिर्योगः प्रसिद्ध्यति ॥" (1/16) अर्थात्

उत्साहः, साहसः, धैर्यं, तत्वज्ञानं, निश्चयं जनसंगपरित्यागः इति। एतानि षड् साधकतत्वानि सन्ति।

① उत्साहः → "अहं विषयान् प्रति धावन्/गच्छन् चित्तं स्थागयामि एव" एतादृशं सङ्कल्पयुक्तं उद्यमम् 'उत्साहः' उच्यते।

② साहसः → कस्यापि कार्यस्य विषये साध्यताऽसाध्यतां विचार्य साध्यतां च ज्ञात्वा सहसा साधकस्य प्रवृत्तिः 'साहसः' उच्यते।

③ धैर्य → 'एतद् कार्यं जीवने पूर्णं भविष्यति एव' एतादृशी दृढ़भावना एव 'धैर्यम्' उच्यते।

④ तत्वज्ञानम् → "अयं ~~सर्व~~ सांसारिकं विषयभोगः असत् अस्ति तथा च एकमात्रं ब्रह्म एव सत्यं वर्तते।" साधकस्य एतादृशं ज्ञानं एव "तत्वज्ञानम्" उच्यते।

Scanned with CamScanner

Scanned with CamScanner

⑤ निश्चयः → सम्बद्ध शास्त्रे, गुरूपदेश वाक्येषु श्रद्धा, विश्वासः स्थापयन् कार्यस्य शुभारम्भः करणमेव 'निश्चयः' इति उच्यते।

⑥ जनसंगपरित्यागः → योगशास्त्रे प्रतिपादितसिद्धान्तानां विरुद्धं ये विचारकाः "अनाचारी दुष्टजनानां सङ्गस्य परित्यागः एव "जनसङ्गपरित्यागः" इत्युच्यते।

अतः शास्त्रकाराः कथ्यते यत् एतेषां षड्गुणानाम् आचरणेन साधकः निश्चयेन योगसाधनायां साफल्यं प्राप्नोति इति।

438. महर्षिपतञ्जलेः अन्यानि कानि नामानि सन्ति? लिखत।
उ. विभिन्नेषु प्राचीनग्रन्थेषु महर्षिपतञ्जलेः नामानि उक्तानि सन्ति यत्- गोनर्दीयः, गोणिकापुत्र, नागनाथ, अहिपति, फणिभृत्, शेषराजः, शेषाहि, चूर्णिकारः पदकारश्च इत्यादयः।

439. महर्षिपतञ्जलिना विरचित कति ग्रन्थाः वर्तमाने उपलब्धाः सन्ति?
उ. त्रयः। ① सामवेदीय निदानसूत्रं ② योगसूत्रं ③ महाभाष्यम्।

440. महर्षिपतञ्जलेः जन्म कुत्र अभवत् तथा च अन्ते कुत्र निवासमकरोत्?
उ. महर्षिपतञ्जलेः जन्म गोनार्धे (गोनिया) अभवत्; अन्ते काश्यां स्थित नागकूपे गत्वा निवासमकरोत्।

441. महर्षिपतञ्जलिः कस्य शिष्यः आसीत्?
उ. महर्षिपाणिनेः।

442. महर्षिपतञ्जलिः कस्य राज्ञः शासनकाले आसीत्?
उ. सम्भवतः राज्ञः पुष्यमित्रशुंग (185-142 ई.पू.) इति।

443. महर्षिपतञ्जलिः कस्य सिद्धान्तस्य प्रतिपादनं कृतवान्?
उ. त्रैतवादस्य - जीव, प्रकृतिः ईश्वरश्च।

444. 'ज्ञान' शब्दस्य धातुः प्रत्ययश्च लिखत।
उ.

445. स्वामी विवेकानन्दस्य अनुसारं ज्ञानयोगस्य परिभाषा किमस्ति?
उ. साधकः अन्धविश्वासान्, दैहिकम् उत पारलौकिकं सर्वासां वासनानाम् त्यागकरणाय तत्परो भवेत् तथा मोक्षप्राप्तये कृतनिश्चयः स्यात् यतोहि ज्ञानेन विना मोक्षप्राप्तिः न भवति।

Scanned with CamScanner

Scanned with CamScanner

४५६. ज्ञानयोगीनः लक्षणं किम् ?

उ. ज्ञानयोगीनः लक्षणमस्ति यत् -

- सः ज्ञानम् अतिरिच्य किमपि न ईप्सति।
- तस्य सर्वाणि इन्द्रियाणि स्वनियन्त्रणे भवति। सः शान्तभावेन सर्वान् कष्टान् सहते। यथा - गुहाकारो नग्नभूमौ शय्या उत राजप्रासादे निवासः; सः समानरूपेण सन्तुष्टो भवति।
- सः दृढविश्वासं धारयति यत् ब्रह्मणः अतिरिक्तं किमपि नास्ति इति। सर्वं मिथ्या अस्ति।
- तस्य मुक्तौ प्रबलेच्छा भवति। सः प्रबल इच्छा - शक्त्या स्वमनसि उच्चतर वस्तुषु दृढविश्वासं धारयति।

४५७. ज्ञानयोगसाधना कति चरणेषु विभाजिता अस्ति ?

उ. द्वे। (क) बहिरङ्गसाधनं (ख) अन्तरङ्गसाधनम्।

४५८. बहिरङ्गसाधनस्य कति चरणानि सन्ति ?

उ. चत्वारि। (क) विवेक (ख) वैराग्यं (ग) षट्सम्पत्तिः (घ) मुमुक्षुत्वम् इति।

४५९. बहिरङ्गसाधनान्तर्गते 'विवेकेण' कः अभिप्रायः ?

उ. विवेकः → विवेकः अर्थात् सदसत् ज्ञानमेव विवेकः। नित्यानित्यवस्तुनः सम्यक् ज्ञानमेव विवेकः इति। उक्तमपि -

"नित्यवस्त्वेकं ब्रह्म तद्व्यतिरिक्तं सर्वमनित्यम्।

अयमेव नित्यानित्यवस्तु विवेक तत्वबोध ॥" अर्थात् नित्यवस्तु एकमात्र ब्रह्म एव अस्ति। ब्रह्मणः अतिरिक्तं सर्वं जगत् अनित्य अशाश्वतम् च अस्ति एतादृशी विवेचन दृष्टिः विवेकः उच्यते। सांख्यदर्शनानुसारं - "ऋते ज्ञानान्न मुक्तिः" अर्थात् ज्ञानेन विना मुक्तिः नास्ति। आत्मनः बन्धनकारणम् एव अविवेकः अस्ति। अयमर्थः ऋषिणा स्वीकृतं यत् "प्रकारान्तरासम्भवाद-विवेक एव बन्धः" (सांख्यदर्शन 6/16) अर्थात् अन्य बन्धनकारणं किमपि नास्ति अतः अविवेक एव बन्धनस्य कारणम् अवगन्तव्यम्।

४६०. बहिरङ्गसाधनायाः अन्तर्गते "वैराग्येण" कोऽभिप्रायः ?

उ. वैराग्यं नाम इहलौकिक भोगैश्वर्यतः पारलौकिक दिव्यस्वर्गीय सुखभोगाः क्षणभङ्गुरं मत्वा तान् प्रति भोगेच्छायाः पूर्णतया परित्यागकरणम् इति। यथा - "इह स्वर्गभोगेषु इच्छाराहित्यम्।"

Scanned with CamScanner

Scanned with CamScanner